# PRINCE SCHOOL

...than Board, English & Hindi Medium, Class VI to XII (Science, Commerce, Arts & Agriculture
Piprali Circle, Sikar-332001 (Raj.), Helpline : 9610642222, 961067-2222
Website- www.princeeduhub.com, E-mail : princepipraliroad@gmail.com

**Class - X**

**Maximum Time - 03 : 15 Hrs.** **Subject - Sanskrit** **Maximum Marks : 80**

## Model Paper - 01 : 2024-25

**परीक्षार्थिभ्यः सामान्यनिर्देशाः–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क अनिवार्यतो लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।
5. सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि।

## 'खण्ड – अ'

**प्र. 1 बहुविकल्पात्मक प्रश्नाः–**

(i) 'शुचिपर्यावरणम्' इति पाठः कस्मात् ग्रन्थात् संकलितः ? 1

(अ) लसल्लतिकातः (ब) ऋग्वेदसंहितातः (स) चरकसंहितातः (द) सामवेदसंहितातः

(ii) लोके महतो भयात् कः मुच्यते ? 1

(अ) बुद्धिमान् (ब) बलवान् (स) धूर्तः (द) कुशलः

(iii) वयोऽनुरोधात् कः लालनीयः भवति ? 1

(अ) शिशुजनः (ब) पुत्रः (स) पिता (द) मित्रम्

(iv) दुर्बलः वृषभः कुत्र पपात ? 1

(अ) वने (ब) क्षेत्रे (स) गृहे (द) ग्रामे

(v) मनुष्याणां शरीरस्थः महान् रिपुः कः ? 1

(अ) आलस्यम् (ब) बलम् (स) श्रमः (द) स्फूर्तिः

(vi) कः वातावरणं कर्कशध्वनिना आकुलीकरोति ? 1

(अ) काकः (ब) पिकः (स) मयूरः (द) बकः

(vii) न्यायाधीशस्य किम् नाम आसीत् ? 1

(अ) बंकिमचन्द्रः (ब) श्रीचन्द्रः (स) कृष्णचन्द्रः (द) राजचन्द्रः

(viii) ‘भूकम्पः + जायते’ इत्यस्य सन्धिपदमस्ति ? 1

(अ) भूकम्पो जायते (ब) भूकम्प जायते (स) भूकम्पो जायेत (द) भूकम्प जायेते

(ix) श्चुत्वसन्धेः उदाहरणमस्ति – 1

(अ) जगदीशः (ब) मनोहरः (स) सत्कारः (द) हरिश्शेते

(x) अनुस्वार सन्धेः उदाहरणमस्ति – 1

(अ) कश्चित् (ब) रामो हसति (स) धूमं मुञ्चति (द) हरी रम्यः

(xi) ‘योजकस्तत्र’ इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति – 1

(अ) योजक + तत्र (ब) योजकः + तत्र (स) योजग् + तत्र (द) योजक् + तत्र

(xii) ‘अधः’ इति पदयोगे का विभक्तिः भवति ? 1

(अ) द्वितीया (ब) तृतीया (स) पञ्चमी (द) षष्ठी

(xiii) ‘परितः’ इति पदयोगे का विभक्तिः भवति ? 1

(अ) प्रथमा (ब) द्वितीया (स) पञ्चमी (द) सप्तमी

(xiv) ‘पर्यावरणम्’ इत्यत्र पदे कः उपसर्गः ? 1

(अ) अव (ब) अनु (स) आ (द) परि

(xv) ‘निर्गच्छति’ इत्यत्र उपसर्ग शब्दं च पृथक् कृत्वा लिखत – 1

(अ) नि + गच्छति (ब) निर् + गच्छति (स) नी + गच्छति (द) नीर् + गच्छति

(xvi) इष् धातोः लङ् लकारस्य रूपम् अस्ति – 1

(अ) इच्छेत् (ब) ऐच्छत् (स) इच्छतु (द) एषिष्यति

(xvii) ‘‘वयं कार्यं **<u>करिष्यामः</u>**’’ रेखांकितपदे को धातुः ? 1

(अ) क्री धातुः (ब) क्रि धातुः (स) कृ धातुः (द) करि धातुः

**प्र.2 निर्देशानुसारं रिक्तस्थानानि पूरयत –**

(i) मुनिः पुनरपि विशदी ................. अकथयत् । (कृ + शतृ) 1

(ii) बुद्धिः ................... तन्वि सर्वकार्येषु सर्वदा। (बल + मतुप्) 1

(iii) कोलाहलः न ................। (कृ + तव्यत्) 1

(iv) ............ गृहं गच्छन्ति। (छात्र शब्दस्य प्रथमा विभक्ति – बहुवचनम्) 1

(v) ............ रेखा श्रेष्ठा अस्ति। (युष्मद् शब्दस्य षष्ठी विभक्ति – बहुवचनम्) 1

**प्र.3 अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –**

परेषाम् उपकारः परोपकारः उच्यते। ''सर्वः स्वार्थं समीहते'' इत्यपि कस्यचित् कवेः उक्तिः अस्ति। स्वार्थाय सर्वेऽपि प्राणिनः जीवन्ति। किन्तु यस्य जीवनम् अन्येभ्यः अस्ति, अपरेषां प्राणिनां सुखाय यः प्रयतते, कष्टं सहते च वस्तुतः तस्यैव जीवनं सार्थकम् अस्ति। पश्य, गावः अन्येभ्यः दुग्धं प्रयच्छन्ति, अतः जनाः ''मातरः'' इति वदन्ति। नदी अपि स्वजलं स्वयं न पिबति, अन्येषां प्राणिनां कृते ददाति। मेघान् पश्यत। स्वजलं सर्वेभ्यः वितरन्ति। पुष्पाणि सर्वेभ्यः सुगन्धं वितरन्ति। वृक्षाः फलानि प्रयच्छन्ति। मातृसमा उपकारिणी का विद्यते जगति ? अतः स्वार्थं विहाय अन्येभ्यः जीवनमेव वरम् ।

**(क) एकपदेन उत्तरत** 1x2=2

(i) काः अन्येभ्यः दुग्धं प्रयच्छन्ति ? (ii) के स्वजलं सर्वेभ्यः वितरन्ति ?

**(ख) पूर्णवाक्येन उत्तरत –** 2x1=2

(i) कः परोपकार : कथ्यते ?

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 1x1=1

**(घ) भाषिककार्यम्** 1x3=3

(i) 'अपरेषां प्राणिनाम्' इत्यत्र विशेषणपदं लिखत।

(ii) 'निरर्थकम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(iii) 'वृक्षाः फलानि प्रयच्छन्ति' इत्यत्र ''प्रयच्छन्ति'' इति क्रियापदस्य कर्तृपदं लिखत।

## 'खण्ड –ब'

प्र.4 बालकस्य कृते दुग्धम् आनय। रेखांकितपदे विभक्तिं तत्कारणं लिखत। 2

प्र.5 अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत। 2

(अ) 182 (ब) 535

प्र.6 संसारे ***विद्वांसः*** ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते। रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत। 2

प्र.7 अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत। 2

क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः,
स एव वह्निर्दहते शरीरम्।।

**प्र.8 अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत।** 2

विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते।।

अन्वयः – अस्मिन् लोके (i)............एवं (ii) ............... प्रकीर्तिताः। अन्येषां (iii)................ ये चक्षुः (स्तः) ते तु (iv)........... मते।

(वदने, विद्वांसः, नामनी, चक्षुष्मन्तः)

प्र. 9 स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। 2

प्र. 10 ''जननी तुल्यवत्सला'' इति पाठसारं हिन्दीभाषायां लिखत। 2

**अथवा**

''सौहार्दं प्रकृतेः शोभा'' इति पाठसारं हिन्दीभाषायां लिखत।

## ‘खण्ड – स’

**प्र. 11 अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।**

‘‘भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीनः इति जानन् अपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिवधुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ?’’ इति प्रत्यवोचत्। ‘‘भद्रे ! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम् ?’’ इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्।

**(क) एकपदेन उत्तरत –** **1x1=1**

वृषभं कः बहुधा पीडयति ?

**(ख) पूर्णवाक्येन उत्तरत –** **1x2=2**

कस्य दैन्यं दृष्ट्वा सुरभिः रोदिति ?

**(ग) भाषिककार्यम्** **1x2=2**

(i) ‘सः कृच्छ्रेण भारमुद्वहति।’ इत्यत्र कर्तृपदं किम् ?

(ii) ‘सहस्राधिकेषु पुत्रेषु सत्सु।’ इत्यत्र विशेषणपदं किम् ?

**अथवा**

विचित्रा दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत् । चौरः एव उच्चैः क्रोशितुमारभत ‘‘चौरोऽयं चौरोऽयम्’’ इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**(क) एकपदेन उत्तरत** **1x1=1**

ग्रामवासिनः कम् चौरं मत्वाऽभर्त्सयन् ?

**(ख) पूर्णवाक्येन उत्तरत** **1x2=2**

रक्षापुरुषः अतिथिं किम् प्रख्याप्य कारागृहे प्राक्षिपत् ?

**(ग) भाषिककार्यम् –** **1x2=2**

(i) ‘‘विचित्रा दैवगतिः’’ इत्यत्र विशेष्यपदं किम् ?

(iii) ‘‘ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छन्’’ इत्यत्र क्रियापदं किम् ?

**प्र.12 अधोलिखितं श्लोकं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।**

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च।।

**(क) एकपदेन उत्तरत** **1x1=1**

जनः कस्य श्रेयः इच्छति ?

**(ख) पूर्णवाक्येन उत्तरत** **1x2=2**

परेभ्यः कदापि किम् न कुर्यात् ?

**(ग) भाषिककार्यम् –** **1x2=2**

(i) मानवः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति। इत्यत्र कर्तृपदं किम् ?

(iii) ‘सः प्रभूतानि सुखानि इच्छति’। इत्यत्र विशेषणपदं किम् ?

**अथवा**

रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयता–

मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।

केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,

यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।।

(क) **एकपदेन उत्तरत** **1x1=1**

गगने बहवः के सन्ति ?

(ख) **पूर्णवाक्येन उत्तरत** **1x2=2**

कस्य पुरतः दीनं वचः न ब्रूयात् ?

(ग) **भाषिककार्यम् –** **1x2=2**

(i) गगने सर्वे मेघाः जलदायकाः न सन्ति ? इत्यत्र क्रियापदं किम् ?

(iii) 'दीनं वचः' इत्यत्र विशेषणपदं किम् ?

प्र.13 **अधोलिखितं नाट्यांशं पठित्वा एतधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।**

रामः – अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः– न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति ।

रामः – अहो माहात्म्यम्।

कुशः – जानाम्यहं तस्य नामधेयम्।

रामः – कथ्यताम्

कुशः – निरनुक्रोशो नाम...........

**(क)** **एकपदेन उत्तरत् –** 1x1=1

जनकः नामतो वेदितुमिच्छामि इति कः वदति ?

**(ख)** **पूर्णवाक्येव उत्तरत –** 2x1=2

'अहो माहात्म्यम्'' इति श्रुत्वा कुशः किं वदति ?

**(ग)** **भाषिककार्यम्** 1x2=2

(i) ''भवतोः जनक नामतो वेदितुमिच्छामि'' वाक्येऽस्मिन् सर्वनामपदं किम् ?

(ii) ''अस्मिन् तपोवने तस्य नाम व्यवहरति।'' इत्यत्र विशेष्यपदं किम् ?

**अथवा**

काकः – रे परभृत् ! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट काकः।

गजः – समीपतः एवागच्छन् अरे ! अरे ! सर्वां वार्ता श्रृण्वन्नेवाहम् । अत्रागच्छम् । अहं विशालकाय, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अतः अहमेव योग्यः वनराजपदाय ।

वानरः – अरे ! अरे ! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)

**(क)** **एकपदेन उत्तरत् –** 1x1=1

काकः कस्य संततिं पालयति ?

**(ख)** **पूर्णवाक्येव उत्तरत –** 2x1=2

गजः कीदृशः अस्ति ?

**(ग)** **भाषिककार्यम्** 1x2=2

(i) 'सर्वां वार्ता श्रृण्वन्नेवाहम् अत्रागच्छम् । इत्यत्र कर्तृपदं किम् ?

(ii) गजः वन्यपशून् तुदन्तं जीवं स्वशुण्डेन पोथयित्वा मारयिष्यति। इत्यत्र क्रियापदं किम् ?

**प्र.14** **यथानिर्देशम् उत्तर लिखत –** 3

(क) पीतम् अम्बरं यस्य सः (समस्तपदं लिखत)

(ख) उपकृष्णम् (समासविग्रहपदं लिखत)

(ग) कृष्णसर्पः (समासस्य नाम लिखत)

**प्र. 15** **मञ्जूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरयत।** 3

(तत्र, अपि, सर्वत्र)

(i) वर्षाकाले.................. जलोपप्लवः भवति।

(ii) ..................कुशलं महाराजस्व।

(iii) योजक............. दुर्लभः ।

## 'खण्ड – द'

**प्र.16** स्वं रमेशचन्द्रं मत्वा राजकीय – उच्च माध्यमिक विद्यालयस्य भरतपुरस्य प्रधानाचार्याय स्थानान्तरण प्रमाण पत्र प्राप्त्यर्थम् प्रार्थनापत्रं लिखतु। 4

**अथवा**

भवती कनकग्रामवासिनी रेखा स्वीकीया सखीम् अंकिता प्रति 'संस्कृतभाषा शिक्षणम्' इति विषये अधोलिखितं पत्रं मञ्जूषापदसहातया पूरयित्वा लिखतु।

(कनकग्रामः अस्माकम्, इच्छति, रेखा, पृथक्, पठित्वा, प्राप्तम्, सुगन्धम्)

(i) .....................................

प्रिय अंकिते! दिनांङ्कः 08/01/2025

नमस्ते।


भवत्या पत्रम् (ii)..................... भवती संस्कृतभाषां पठितुम् (iii) .......................। एषा भाषा वैज्ञानिकी । संस्कृतम् (iv)....................देशस्य प्रसिद्धा भाषा। भारतीय संस्कृतेः संस्कृतम् (v) ..................कर्तुम् तथैव न शक्यते तथा पुष्पेभ्यः (vi)........................ ।अतः भवती अपि संस्कृतं पठ्तु एवं च (vii) ........................प्रचारं करोतु।

भवत्याः प्रियसखी

(vii) ............................

**प्र. 17** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि 'उद्यानस्य विषये' लिखत। 4

**[वृक्षाः, गृहाणि, गावः, जलाशयः, हंसाः, पृष्ठतः, नौका, बालिका, जलम्, पुरुषः, स्त्री, नदी]**



**अथवा**

**मञ्जूषायाः उपयुक्तपदानि गृहीत्वा 'धूम्रपान-निवारणाय' इति विषये गुरुशिष्ययोः वार्तालापं पूरयत –**

**[गन्तुम्, अस्य, तुभ्यं, धूम्रपानं, स्वास्थ्य, प्रेरणीयाः, मया, दुर्व्यसनस्य]**

सोहनः – गुरुवर। अहं पश्यामि विद्यालये केचन छात्राः............कुर्वन्ति।

गुरुः – वत्स! धूम्रपानं ...............विनाशकमस्ति।

सोहनः – गुरुवर। कोऽस्य................निवारणोपायः।

गुरुः – पुत्र ! जन – जागृतिरेव.....................दुर्व्यसनस्य निवारणोपायः ।

सोहनः – गुरुवर ! ..................... किं करणीयम् ?

गुरुः – त्वया छात्राः ................यत् अस्माभिः धुम्रपानं न करणीयम्।

सोहनः – गुरुवर ! एवमेव करोमि । अधुना अहं..............इच्छामि।

गुरुः – वत्स ! महत्त्वपूर्णं विषयोपरि वार्ता कर्तुं................धन्यवादं ददामि।

**प्र.18 अघोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत।** 4

**(i)** विद्यालय के पास गाँव है।

**(ii)** राजमार्ग के दोनो ओर वृक्ष हैं।

**(iii)** सुरेश कुत्ते से डरता है।

**(iv)** वे दोनो बाजार जाते है।

**(v)** तुम सब यहाँ ही पढ़ो।

**(vi)** हम सब घर जायेंगे।

**प्र.19 अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजकं कृत्वा लिखत –** 3

(i) सः प्रतिदिनं बहून् पशून् हत्वा खादति स्म।

(ii) एकदा यदा शशकस्य क्रमः आगतः, तस्य विलम्बागमनेन सिंहः कुपितः जातः ।

(iii) सिंहः जले स्वप्रतिबिम्बं दृष्ट्वा तस्मिन् कूपे अकूर्दत् ।

(iv) कस्मिंश्चित् वने एकः सिंहः वसति स्म।

(v) तदा सर्वे पशवः विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे भोजनार्थम् एकं पशुं प्रेषयितुं निश्चितवन्तः ।

(vi) तदा चतुरः शशकः सिंह कूपस्य समीपम् अनयत् ।

(vii) अतः लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति ।

**अथवा**

अधः मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन षड्वाक्यानि 'संस्कृत–भाषायाः महत्त्वम्' विषये लिखत।

[ज्ञानवर्धनाय, कथाः, श्लोकाः, आवश्यकम्, जननी, ज्ञानं, वेदाः, रामायणम्]